
सावद्यानुमतेः । १६७

न चाविधिः । १६८

प्रायश्चित्तानुक्तेः । १६९

अन्तरायः । १७०

मुहूर्त्तमानादीनां सामा-
यिकादित्वाद्दिनरात्रितदुभय-
व्यवहारार्थं प्रतिनियत-
दिवसशब्दः । १७१

धरणकालार्थो न तु
ग्रहणकालार्थः । १७२

यावत्कथिकप्रतिपक्षत्वात् । १७३

दुर्वाराऽतिथिसंवि-
भागस्यापि पर्वकर्तव्यता । १७४

पर्वोत्तरे दिने । १७५

दानोच्छेदोऽन्यदा । १७६

तदतिचाराणां परिहार्य-
त्वादव्रतिदानदृष्टान्ताच्च
न स भिन्नो दानात् । १७७

अदत्ताऽभोगविशेषस्तु-
सामान्यश्राद्धधर्मः । १७८

नियमात् पर्वानुष्ठानं
पौषधः । १७९

पौषधत्रयकारिष्वपि
चतुर्दश्यादिपाठात् । १८०

उभयसन्ध्यं सामायिका-
करणवत्तदा तदकरणे-
न्यूनता श्राद्धत्वस्य । १८१

अन्यसामायिकानिषेध-
वदेतस्यान्यदा न निषेधः । १८२

प्रतिमात्राह्दिष्वप्युभय-
मित्युक्तेः । १८३

बहुशउभयसन्ध्ययोर्नैवं
विरोधः । १८४

न च प्राक् स्वाद्याद्य-
जिनदत्तात्तन्निषेधोक्तिः । १८५

न चाद्यः जिनेश्वराचार्याः । १८६

नवाङ्गी(स्थानाङ्ग)-
प्रशस्त्यादिषु तच्छिष्यै-
स्तथानुदितेः । १८७

जिनचन्द्रधनेश्वरादि-
भिस्तद्वंशजैरपि । १८८

कूर्चपुरीयं जिनेश्वरं
जिनवल्लभो गुरुमाह
षष्टिशतकविशेषावश्यका-
दर्शादिषु । १८९

न च दूर्लभराजसत्ताऽ
शीत्यधिकसहस्रे । १९०

तदाचार्याऽपि तदा
जावालिपुरे । १९१

स्पष्टकष्टकवृत्पादौ । १९२

कल्पितो वादः । १९३

सद्भूतनिह्नवासद्भूताद्-
भावनपाठलोपनूतन-
क्षेपनिन्दा इति स्वायधर्मः।१९४

तद्वंशजकृत्यश्च सा धर्म-
बहुमानार्था । १९५

म्लेच्छकृताऽर्हिंसाया यथा। १९६

मरीचिप्रतिबोधितानेक-
नृपदीक्षावत् । १९७

मार्गानुसारिणोऽपि मार्ग-
कृत्यस्यानुमोदनावत् । १९८

सदंशमात्रं तु तत्त्वे
निरूपचरितेतरधर्माख्या-
पकस्य न दुर्भाषितता
भ्रमणं च तन्मूलम् । १९९

जैनीयमोक्षश्रद्धायां
शुक्लपाक्षिकतोचिता । २००

नैवं चात्मोच्छेदमुक्ति-
वादिनां तथाभावः । २०१

अभव्यानामपि व्याग्रहा-
रिकाभोगिकभावात् । २०२

न च प्राक्पञ्चदशशताब्द्याः
स्वाद्यभिधानम् । २०३

पर्वप्रतिनियतदिवसयो-
रर्थान्तरत्वे मौग्ध्यं
श्रीहरिभद्रादीनाम् । २०४

तपाशब्दोपलब्धिस्त्रयो-
दशशताब्दीतः । २०५

'सुविहिये'त्यत्र 'खरयरिये'ति
'सुरवरवरलद्धे'त्यत्र च
खरयरवरलद्धे'ति च पाठ-
परावृत्तिर्धर्म एव खराणाम् ।

समाना चतुष्पर्वी । २०७

पूर्णिमायां प्राक् पाक्षिक
मिति कुविकल्पः । २०८

तिरस्काराद्यपमारेऽपि
थाचेष्टनात् । २३४
अल्पनिर्ग्रन्थत्वोक्तिः । २३५
नन्तद्रव्यश्रामण्यमप्येवम् ।
शास्त्रप्रामाण्ये भाव-
श्रामण्यम् । २३७
सम्भ विख्यातमहत्त्वानाम् ।
दर्शनीयमोहाद्युपशमादौ
स्वाभाविकम् । २३९
तदन्यस्य मार्गश्रद्धावत् । २४०
अन्यथा जैनाभासा
अपि जिनप्रामाण्यवाचः । २४१
श्रुतवाक्यानुपलब्धिं
यावद्गुरुनियोगाज्ञाने । २४२
श्रुताप्रामाण्ये महत्तमं
मिथ्यात्वम् । २४३
लाभे रत्नस्य तत्क्षेप्तृवद् । २४४
बलवती भवितव्यता । २४५
अभव्यस्वभाववत् । २४६
अनन्ताः प्रतिपातिनः । २४७
आप्तोक्त्यैव विश्वासः । २४८
सूक्ष्मा बुद्धिरावश्यकी । २४९
विघातोऽन्यथा । २५०
न हि जाड्यं रक्षाहेतुः । २५१
दर्शनशुद्धं ज्ञानम् । २५२
चारित्रं मोक्षद्वारम् । २५३
'तद्द्वेषी चे'त्युक्तेन
जिनवचःप्रामाण्योक्ति-
विश्रम्भस्थानम् । २५४
स्वान्यमतपोषशोपपराणां
यत्किञ्चिदनन्ता-
नुबन्ध्यौदयादनन्त-
संसारवर्धनम् । २५५
गालिप्रभृतेरपि विषयशुद्धेः ।
स्वरूपं न क्लेशाय । २५७
तथाविधानां तद्भावे
परिणत्यवलोकनम् । २५८
यूकाभयाद् वस्त्रपरित्याग-
वन्न तत्तद्भयात् सन्मार्ग-
परिहारः । २५९
शास्त्रन्दसभेंऽपि तथा-
विधानां तद्भावात् । २६०

दुर्जनानां परिहारो- दूरतः ।

नैते श्रवणार्हाः । २६२

राश्युदयवदत्रोदययुक्तत्वं न ।

'पडिपुण्णं पोसहमि'त्युक्तेः ।

प्रतिक्रमणप्राधान्यात् तत्काले ।

आमध्यत्वात्तत्काला-

नियमात् । २६६

अद्धाप्रत्याख्यानं

सूर्योदयादनु । २६७

'उग्गए सूरे' वचनात् । २६८

अनागतस्य तत् । २६९

प्रातः प्रत्याख्यानवेला-

रम्भाऽतः । २७०

अर्वागुदयादेकादशप्रति-

लेखना इति । २७१

भाद्रशुक्लप्रतिपदि पारणं

कल्पपष्ठात् । २७२

निर्विप्रधानान्यष्टम्यादिपौषधाः ।

न१ प्रधानाः कल्याण-

कदिवसः २७४

रथनिष्क्रमणाऽमाघाता-

दयोऽपि । २७५

विपाकोक्तेहिंसावृद्धा-

अष्टम्याद्या लौकिके । २७६

मदनत्रयोदश्यादयस्तिथयः ।

नागपञ्चम्यादीनि पर्वाणि । २७८

तदुभयपरिहार्य तिथिः । २७९

साधुसाध्वीश्रावकश्राविकाः ।

वर्षावस्थानापेक्षा पञ्चमी-

दशम्यादीनां पर्वाख्या । २८१

सूर्यप्रज्ञप्त्यादिष्वपि । २८२

पूर्णिमेति कोशकाराद्याः । २८३

आधुनिकजैना द्वितीयाद्याः

प्रतिपक्षं षट् । २८

चतुष्पर्वीत्याद्या द्वादश-

शतकात् । २८

अन्यतमां तिथिमुद्दिश्येति

तत्त्वार्थभाष्यम् । २८

पौषधोपवास इत्याख्या

व्रतस्य । २८

पौषध इत्यर्वाक् ।

गरर्त्तितिवचनात् केवलो
ात्रिकस्तिथिनियमहीनश्च ।
चतुर्विधे नियमात्
सामायिकम् । २९०
साकारोच्चारे विवक्षा । २९१
जावनियमप्रतिज्ञायां
ात्यन्त सामायिकं
जावपोसहं ति नियमे । २९२
देशतोऽप्याहारत्यागः । २९३
कल्याणकाद्युत्सवस्तदोत्तरे
तस्मिन्नार्हते । २९४
क्षे प्राधान्यं तदाऽधुना तिथौ ।
दीपावलौ लोकस्य । २९६
शेषपर्वतिथिषु लौकिक-
मनृग्रम् । २९७
उत्तरार्धपार्थक्ये हेतुः । २९८
संस्कारे गौरवम् । २९९
सूत्राणां सर्वत्र सोपस्कारता ।
क्षये वेदस्यासम्बुद्धता । ३०१
पूर्वा तिथिरित्यस्य वृद्धा-
वित्यस्योत्तरेत्यस्य च । ३०२
पर्व तिथेः पर्वतिथिसञ्ज्ञा-
नुष्ठानयोरित्यध्याहारः । ३०३
सत्त्वासत्त्वे अनपेक्ष्य
प्रत्याख्यानकालो
व्यपदेशमूलम् । ३०४
अशक्यपरावर्तौ तिथ्युदयौ । ३०५
सत्त्वासत्त्वे च । ३०६
नातीतानागताराधनेतरे । ३०७
नान्यपदेशे व्यवहारा-
नुष्ठाने । ३०८
तद्विद्भ्यः सः । ३०९
सञ्ज्ञाहीनो लौकिके-
तरभ्रष्टः । ३१०
आगम आचरणा च मार्गः । ३११
बलवत्युत्तरा । ३१२
प्रायश्चित्ते । ३१३
उद्देशादिष्वपि । ३१४
'करणओ'ति वचनात । ३१५
सामाचारीति । ३१६
पर्युषणादिपरावृत्तेरप्य-
प्रामाण्यापातात् । ३१७

यावत् सम्भव इति-
पूर्वतरा । ३१८
पूर्णिमेतिव्यपदेशात्
चतुर्दशीनामलोपापत्तिः। ३१९
व्यपदेशो व्यवहारसम्मतसत्ये।
लोकेऽपि जन्माष्टमी-
शिवरात्र्यादौ । ३२१
[illegible] तत्त्रयोदश्या
[illegible]व्यपदेशः। ३२२
[illegible]मासाः संवत्सर
इत्यनुवादः । ३२३
[illegible] [illegible]-

[illegible]यनियमेऽपि अर्थ[illegible]
मास इत्यनेकशः [illegible]
सूत्रोक्तिः ।
अशित्यधिके [illegible]
पि नवमशतकेऽभि[illegible]
नियमेऽपि [illegible]
इत्युक्तिः [illegible]
'अजन वे'त्युक्तेः ।
वर्षादिना [illegible]
[illegible]नेऽपि [illegible]
[illegible]
[illegible] ।

तुर्दश्यादिषु पौषधनियमोऽ- १५
ारिणाम् । १६
क्षये पूर्वं तिथेः ।
त्रयोदशीतृतीयास्वीकारे
आयत्यां चतुर्दशी-
स्वीकारात् प्रत्याख्याना-
वरणाप्रत्याख्यानानन्ता- १७
नुबन्धिपातः ।
पूर्णिमापञ्चमीक्षये न
चतुर्दश्यादिपर्वतिथि- १८
लोपः ।

क्षयस्यास्वीकारे वृद्धेरपि । १
दिनैकषष्ठिद्वाषष्ट्यंशमा- २
नोत्तरे तिथिः ।
चतुष्पञ्चाशदादिपञ्च-
षष्ठ्यन्तघटिका लौकिके । ३
अनियताद्यन्ता । ४
उदयस्पृक्सूर्योदयाद्यन्ताऽऽ- ५
राध्या ।
क्षय आद्या । ६
परे वृद्धिरपि । ७
विधिनियमौ क्षयवृद्ध्योः
पूर्वोत्तरयोः सञ्ज्ञापूर्विकाऽऽ- ८
राधनेति ।
पूर्वसञ्ज्ञानाशान्त्यो- ९
दयिकी त्वाख्यानात् । १०
ऐतिह्यमपि ।
उदयवत्या निर्देशोऽन्यत्र ११
क्षयवृद्धिप्रसङ्गात् ।
पूर्वाह्णव्यापित्वादिना
निर्देशेऽहोरात्रिकपौषध-
तपोब्रह्माऽभिग्रहादिबाधः । १२
आज्ञाभङ्गादयश्च ततः । १३
अष्टम्यादि उद्देशवत्या- १४
राधना ।
नाखण्डा क्षयवृद्ध्योः । १५
नोत्तरे मासोद्देश्यका । १६
कल्याणकादीनि पूर्वो-
त्तरयोरुचितःपर्वाबाधया । १७
चन्द्रकर्मणोः कर्मसूर्य-
योर्दिनमानविश्लेषे

तिथिदिनहानिवृद्धिः । १८

लौकिकाश्रयणैतिह्यम् । १९

सूर्योदयवती प्रत्याख्यानवेलागता वा तिथिरित्यस्य न तावत् कालमाराध्येति न तत्प्रभृत्याराध्येति परंतिथिसूर्योदयमर्यादयाऽऽराध्येत्यर्थः आद्ये प्रत्याख्यानागतविपयताव्याघातः द्वितीये अष्टम्याद्युद्देश्यकनियमपालनेऽपि मूलगुणाद्यप्रत्याख्यानभङ्गादि पौषधपालनाय तृतीयविकल्पः । २०

अन्ये उदयवतीषु सप्तम्यादिष्वष्टम्यादितिथेः सञ्ज्ञाया अभावे तदाराधनाया अपि । २१

किञ्च परसूर्योदयं विना पूर्वतिथेरेव व्यपदेशो युक्तः । २२

सप्तम्यादिष्वष्टम्यादितिथिधृतिर्नैव युक्ता 'क्षये पूर्वे'ति प्रघोषात् समग्राया अष्टम्यादित्वव्यपदेशो युक्तः । २३

लौकिकलोकोत्तरान्यतरपञ्चाङ्गमाश्रयणेऽपि विधानादौ संस्कारस्यावश्यकता । २४

तिथ्युद्देशेन विधानोक्तेः । २५

पञ्चाङ्गे उद्दिष्टतिथेर्वृद्धिहानी यतः । २६

सूर्योदयाभावतद्द्वयव्याप्ती । अभाववस्तु तत्र । २७

विधानं तु सकलतिथिविषयकम् । २९

उत्तरे नियता अष्टम्याद्याः प्रतिमासम् । ३०

ज्ञानपञ्चम्याद्या वार्षिक्यः । ३१

आद्यपर्वतिथेः क्षयवृद्धी भोगसमाप्तिमत्यां तदाराधने । ३२

द्वितीयस्याः पूर्वतरा । ३३
लौकिका अपि तत्तदाख्या पूर्वकमाराधका जन्माष्टम्यादिषु । ३४

उदयस्पृष्टाऽपरसूर्योदयान्तं व्यपदेष्टव्यास्तिथयः । १
प्रातः प्रत्याख्यानवेलाया-मारम्भस्तासाम् । २
उदयानुसारेण दिवस-व्यवहाराः । ३
एकषष्टेर्भावात् । ४
आषाढीतः पञ्चाशदुक्तेः । ५
षष्ठीसूर्योदये संवत्सरोक्तेः । ६
तास्तिथयः सूर्योदय-माप्नुवन्तः (न्त्यः) । ७
इतरस्यां क्रियमाणायाम् अयुक्तेः । ८
इति अद्यवासरे तस्मिन् दिने चोक्तेः । ९
अन्यथा मिथ्याव्यपदेशः । १०
प्रतितिथि तदभावापत्तेः । ११
समाप्तावपि साङ्कर्यम-क्षीणपर्वणोऽपि तदपाताच्च । १२
भोगाधिकसम्पूर्णताग्रहवतां प्रतिबन्दी । १३
पर्वतिथिक्षयवृद्ध्योर्वि-पर्ययः 'त्रयोदशीचतु-र्दश्यो'रिति 'त्रयोदशी-व्यपदेशाभाव' इति 'चतुर्दश्येवे'ति 'औदयिक्ये-वे'ति त्रयोदशीवर्धन-मित्यस्य चोक्तेः पट्टक-पत्रादिवचनात् । १४
लोकेऽपि जन्माष्टमीविजया-सफलादीनाम् । १५
आराधना तिथ्यनुगा नान्यथा । १६
सर्वदाऽनियमेन । १७
तिथिष्वन्यथा । १८

वादविवरणम् ।

नत्वा वादीभसिंहं श्री-वीरं शिवपथोद्दिशिनं ।
वादे विवरणं किञ्चित् स्वान्यबोधाय रच्यते ॥१॥

यावन्निर्णयं यावत्स्फूर्ति च वदनं वादः । १

आरम्भकप्रत्यारम्भकौ वादिप्रतिवादिनौ । २

जिगीषु-स्वतत्त्वनिर्णिनीषु-परतत्त्वनिर्णिनीषु-क्षायोपशमिककेवलज्ञानिसंयोगात् षोडश वादाः । ३

द्वितीयपञ्चमान्त्या न । ४

बौद्धसाङ्ख्ययोः साङ्ख्यगौतमयोरबुद्धगौतमवीरयोरिन्द्रभूत्यग्निभूत्योः शिष्यगुर्वोः अबुद्धगौतमवीरयोः केशिप्रदेशिनोः केशिप्रबुद्धप्रदेशिनोः केशिगौतमयोः प्रबुद्धगौतमवीरयोर्वीरगौतमयोर्वीरपाखण्डिनोर्वीरगौतमयोश्च क्रमेण । ५

प्रथमतृतीयतुर्यषष्ठत्रयोदशाश्चतुरङ्गाः । ६

शेषा यथासम्भवं द्वित्र्यङ्गाः । ७

वादिप्रतिवादिसभ्यसभापतयोऽङ्गानि । ८

निग्रहानुग्रहक्षमः सभापतिः । ९

व्यवस्थापकाः सभ्याः । १०

वादप्रतिवादाभ्यां साधनदूषणे वादिप्रतिवादिकर्म । ११

मानी क्रूरो द्वेष्टा मूढः शुष्कोऽनर्थहेतुः । १२

लाभार्थी छलजात्यादिप्रधानो दुःस्थितो विवादोऽतिपातलाघवफलः । १३

परलोकप्रधानो मध्यस्थः ज्ञातस्वशास्त्रो धर्म्यं धर्मप्रतिपत्ति-मोदनाद्यफलः । १४

जात्यैवाभव्यस्य । ७९

न भव्योच्छेदः । ८०

सर्वदानन्तभागो निगोदस्य ।

अवगाहनाभेदेऽपि सूक्ष्म-
बादरनिगोदजीवानन्त्यं
बहुसमम् । ८२

अनाद्यतीतवदनागतोऽ-
नन्तभागः । ८३

भव्यानां मुक्तिः । ८४

अन्ययोगव्यवच्छेदः । ८५

सामग्र्यप्राप्तेः । ८६

वर्षाभावे बीजाङ्कुराभाववत् ।

न बीजकर्करसाम्यम् । ८८

न कार्यगम्या योग्यता । ८९

तथाभव्यत्वाद्यथाकाल-
व्यावहारिकता–नरत्व–ग्रन्थि-
भेदविरत्यादि । ९०

सहकारिणः परिणामवृद्धया-
दिकाः । ९१

अप्रतिपातसङ्ख्यासङ्ख्यान-
न्तकालपतितत्वादि ततः । ९२

निह्नवत्वाद्यपि । ९३

शासनद्रोहाश्रद्धाने । ९४

तद्भवोभवानन्त्यनियमः । ९५

परिणामशुद्धेरननुभवोपि । ९६

दुर्लभबोधिकाः । ९७

सिद्धिक्षेत्रानभिधाने
सङ्ख्यानं स्थूलानाम् । ९८

वीरसप्तविंशतिभववत् । ९९

प्रज्ञापनीयैपैव । १००

दृढप्रहारिमुख्याणां न
हिंसा न वैराद्यनुबन्धिनी । १०१

'चत्तारिपंचवेइंदिये'त्यादि-
वन्निषेधाय आगामिभद्र-
त्वस्य नानन्तप्रतिबन्धाय । १०२

अविरुद्धं तदानन्त्यम् । १०३

अव्यवहारिकाः अनादयः । १०४

निगोदानन्तभागसिद्ध-
सङ्ख्यानुपपत्तिरन्यथा । १०५

सिद्धयसमसङ्ख्य
व्यावहारागमः । १०६

तिथिदर्पणः ।

मोक्षमार्गप्रदं वीरं नत्वा युक्त्यागमोक्तिभिः ।
भव्यानां धर्मशुद्ध्यर्थं क्रियते तिथिदर्पणः ॥१॥

ननु तिथीनां—पर्वतिथीनां हानिः स्यान्नवा ?, स्यात् चेत्
तत् तत्तिथिपर्वतिथिनामाङ्किताऽऽराधना कथं कार्येति ।

उभयेषामपि हानिर्ज्योतिष्कगणितेन स्यादेव, परं
र्वतिथेर्हानावपि गणितापेक्षयाऽऽराधनायां न हानिः, किन्तु
आषाढीपूर्णिमाया गणितापेक्षयाऽऽवश्यकक्षयेऽपि श्रीनिशीथ-
शाश्रुतस्कन्धनिर्युक्तिचूर्णिकारैः तस्याश्चतुर्दश्याः सञ्ज्ञाम-
नीय पूर्णिमेति प्रतिपादनात् पूर्वायाः अपर्वतिथेर्व्यपदेशं
रित्यज्य तत्र पर्वतिथेर्व्यपदेशं कृत्वैव तत्तत्पर्वकृत्यविधानं
वेधेयम । तत्त्वतरङ्गिण्यामत एव चतुर्दश्याः क्षये त्रयोदशी-
व्यपदेशं परित्यज्य चतुर्दश्या एव व्यपदेशः कार्य इति
पष्टमुक्तम् । तद्दिनं त्रयोदशीनाम्ना व्यपदेष्टारं तु मूर्खशेखरकोट
थापितः । ताम्रयुक्तसुवर्णाभरणे स्वर्णाभरणदृष्टान्तेन दृढीकृता
त्र तत्र तद्व्यपदेशकृतिरिति ।

ननु पर्वतिथेर्गणितेनागतायां हानावाराधनायां पूर्वस्या
यपदेशं निरस्य तत्र क्षीणायाः पर्वतिथेर्व्यपदेशं कृत्वा च
न्नामाङ्किताऽऽराधना क्रियते, परं यदि पूर्वाऽपि सा
र्वतिथिर्भवति तदा किं कार्यमिति चेत् ? ।

तादृशे प्रसङ्गे पूर्वतनीमपर्वतिथिं निरस्य तत्र पूर्वां पर्वतिथिं व्यपदिश्य तदाराधना कार्या, द्वितीयदिने च गणितफलागतां पर्वतिथिं निरस्याग्रेतना पर्वतिथिः कार्या। यथा पूर्णिमामावास्ययोर्हानौ त्रयोदशीं निरस्य चतुर्दशीकृत्यं तत्र चतुर्दशीमिति व्यपदिश्य कार्यं, चतुर्दशीदिने च चतुर्दशीसञ्ज्ञां निरस्य तत्रामां पूर्णिमां वा क्षीणां सतीं व्यपदिश्य तत्राऽमापूर्णिमयोर्यथायथमाराधना कार्या। एवमेव भाद्रपदशुक्लपञ्चम्याः क्षये तस्याः सांवत्सरिकत्वापगमेऽपि पर्वतिथित्वस्यानपगमात्तृतीयायाः स्वव्यपदेशं निरस्य चतुर्थीं च व्यपदिश्य सांवत्सरिकं कार्यं, द्वितीयदिने च तस्याः पञ्चमीं व्यपदिश्य तत्कार्यं कार्यम्।

ननु 'उदयंमि जा तिही सा पमाणमियरीइ कीरमाणीए। आणाभंगऽणवत्थामिच्छत्तविराहणं पावे' ॥१॥ त्ति प्रमाणेऽविवादास्पदे जागरुके किमेवमौदयिकयोस्त्रयोदशीचतुर्दश्योर्व्यपदेशाभावः कथ्यते? इति। सत्यं, 'नहि मूर्खाणां ग्रामा वसन्ती'ति न्यायः सत्यापित एव भवद्भिः। यतोऽत्रोदयकालीनायाः स्वल्पाया अपि पर्वतिथेः समस्तदिनं यावद् व्याप्तिं प्रमाणशब्देन निर्दिशति, निषेधयति चैवं कृत्वा पूर्वाह्णादिव्याप्तां तिथिमभ्युपगन्तॄनिति यथास्थितोऽर्थो न बुद्धो भवद्भिरिति। किञ्च-गाथेयं हानिवृद्धिप्रसङ्गं विहायैवोपयुज्या। अत एव एतस्या गाथायाः अनन्तरमेव 'अह जइ कहवि न लब्भंति

ताओ सूरुग्गमेण जुत्ताओ'त्यादिगाथा पठिता। यदि चोदयमन्तरेण तिथेरप्रमाण्यमितीष्यते तर्हि क्षीणायां पर्वतिथौ पञ्चाङ्गे दृष्टायां तदाराधना मूलत एव तदुदयाभावात् त्यक्तव्या। अनुदितायां नव्योत्थापकमतेन च पूर्वापर्वतिथि-सञ्ज्ञायां तिथौ पर्वतिथिनामाङ्कितमनुष्ठानं विधेयम्। विधाने चैवं विधे कृते इतरप्रमाणीकरणाद् ध्रुवा आज्ञाभङ्गादयो दोषा नव्यसम्मूर्च्छिमोत्थापकानाम्।

किञ्च-यद्युच्येत-अस्त्यस्माकमवने प्रबलं साधनं श्रीउमास्वातिवाचकप्रघोषः-'क्षये पूर्वा तिथिः कार्ये'तिलक्षणः, सत्यमस्ति, परं सोऽनुदिताया अपि क्षीणत्वेन पर्वतिथेरा-सूर्योदयादाऽऽपरसूर्योदयं व्यपदेशार्थं पूर्वापर्वतिथिव्यपदेशस्य निवारणायैवोपयुज्यते। एवं च प्रघोष एव भवद्विहितोद-यैकान्ततात्पर्यविरोधं सन्धत्ते। न च पूर्वापरबाधितार्थं वचः शासने जैने शोभावहं' तस्मा चलनाक्षमगोग्राहकनोद्रसदृशी भवन्तो दशामन्वयासुः। अपि चानुदयवत्यामपि पर्वतिथौ पर्वतिथिं व्यपदिश्य तत्पर्वतिथिनामाङ्कितं पाक्षिकपौषधादिकं कुर्वतां श्राद्धानां कथमाज्ञाभङ्गादयो दोषाः प्रभवन्ति? इत्यपि तद्बोद्र इव नैव विचारितं भवद्भिः, न च विचारितं भवद्भिरेतदपि-यत्क्षीणायां पर्वतिथौ पूर्वस्यां तद्व्यपदेशम-पर्वतिथौ कृत्वा तन्नामाङ्कितकार्यकरणे कथं लगेयुराज्ञाभङ्गा-दयो दोषा? इति।

ननु यदि पूर्वाह्णव्यापिन्या तिथ्या पर्वतिथित्वस्य स्वीकारे कथं ते आज्ञाभङ्गानवस्थे दोषौ ? इत्यपि न अविचा-रितमिति चेत् ? शृणु, आज्ञाभङ्गो नाम पूर्वपुरुषाणां वचनां उल्ल-ङ्घनसमीक्षणं, प्रथमं तावदाज्ञा पूर्वक्रमभाविणां सूर्योदय-मस्पृशन्ती तिथिः पर्वत्वेनाभ्युपगम्यापि श्रीणीति व्यपदेश्या। अल्पं कालमपि या सूर्योदयं नैव स्पृशेत् ? यदि या तत्सूर्यो-दयवर्ति दिवसे व्यपदेश्यत्वेनेति जैनज्योतिर्विदां सिद्धमेवैतत्। ततः पर्वतिथिनामाङ्कितेषु प्रत्याख्यानपोषधादिषु कार्येष्वपि सैवोपयुज्यते, सर्वेषामद्धाप्रत्याख्यानानां सूर्योदयापेक्षमेवो-च्चारात्। 'उग्गए सूरेण'त्यादि पाठोऽप्येतदेवाख्याति। पूर्वाह्णादिव्याप्तिमतीं तिथिमभ्युपगच्छद्भिः स्पष्टमेवान्यथा व्यपदिश्य पर्वतिथिं लुप्तमेवेत्याज्ञाभङ्गः। अनवस्था तु स्वयं प्रत्याख्यानदेवसाक्षिकगुरुसाक्षिकतत्करणतत्पारणतत्तिथि-सत्कपाक्षिकादिप्रतिक्रमणक्रियाप्रभृतिषु क्रियासु कोऽपि कश्चित् तत्क्रियामुद्दिश्य तत्तत्पर्वतिथेर्व्यवहारं करोति, सूर्योदयनियन्त्रणस्यानभ्युपगमात्। तदेवमाज्ञाभङ्गानवस्थे सुष्ठुतरं बाधेते परपक्षे।

ननु मिथ्यात्वाख्यस्तृतीयो दोष उच्यते स आज्ञा-भङ्गोत्थोऽन्यथा वेति ? चेत् तदुत्थः स तदुक्त्यैव गतार्थः स्यात्, परमत्र सोऽन्यथैव यः सूर्योदयादासूर्योदयं पर्व-तिथिं नाभ्युपगच्छेत्, परं भोगो यदा तस्या आरभ्य

यस्तदारतः पर्वतिथिसत्त्वं तत्क्रियामारभेत, समाप्ते च तद्भोगे तन्नामाङ्कितक्रियां प्रत्याख्यानादिकमुज्झेत् । ततश्च स्पष्ट एवाद्धाप्रत्याख्यानमर्यादाया अश्रद्धानाद्रात्रिभोजनादेस्तथोक्तिवशेनाभ्युपगमात् कर्त्तव्यत्वेन स्पष्ट एव मिथ्यात्वदोषः । संयमादिमूलोत्तरगुणाविराधनाऽपि पौषधप्रत्याख्यानादीनामन्यथाकृतेर्न निरूपयितुमशक्येति स्पष्टा एवाऽऽज्ञाभङ्गादयश्चत्वारोऽपि दोषाः पूर्वाह्णव्यापिन्याः पर्वतिथेरभ्युपगमे इति ।

इदमत्रावधेयं—यस्मिन्नहनि या तिथिः सूर्योदयं स्पृशति सा तस्मिन्नेव समग्रेऽहनि मन्तव्या तत्सूर्योदयादपरसूर्योदयं यावदेव । तथा च पूर्वदिने पर्वतिथेर्बहुरल्पो वा भोगोऽकिञ्चित्करः । तत्र तन्नामाङ्कितानामनुष्ठानानामकरणे तत्तिथिनामाङ्कितनियमस्वीकारस्य क्षतिः । यतो न सा तिथिः पूर्वतिथिसूर्योदयस्पृष्टा, सूर्योदयस्पर्शवत्यां च पर्वतिथौ परापर्वप्रवेशेऽपि तत्र दिने तत्पर्वतिथिनामाङ्कितकृत्यानां ब्रह्मचर्यसचित्तत्यागादीनामकरणे च स्पष्टो नियमभङ्ग इति । तत्रमिदं 'उदयमि जे'त्यनेन तिथेरारम्भः सूर्योदयात् अवसानं चापरसूर्योदयान्त एवेति नियमनेन सिद्धिमायातम् । यश्च जिनप्रभश्चतुर्दश्याः क्षये त्रयोदश्यां चतुर्दशीपर्वतिथिनामाङ्कितकरणं विधिप्रपायामभ्युपयन् चतुर्दश्या भोगबाहुल्यं हेतुत्वेनाऽऽह तत्त्वकिञ्चित्करम् । यतो बह्वीनामुदयवतीनामष्ट-

तत्र तिथिक्षयवृद्धयोः [illegible] पौषधाद्याराधनेति।

ननु कतिधाः पर्वतिथयः ? इति । प्रतिमासमष्टमी-चतुर्दशी पूर्णिमाऽमावास्येति नामतश्चतस्रः पञ्च तिथिद्वयाश्च पर्वतिथय आगमाभिप्रायेण, शुक्लद्वितीयापञ्चम्येकादश्यभिप्रायेण तु द्वितीयापञ्चम्यष्टम्येकादशीचतुर्दशीपञ्चदशीरूपाः प्रतिपक्षं षट् तिथयः । एताश्च कालपावित्र्येण पर्वतिथयो मताः । अक्षयतृतीयाद्यास्तु कार्यपावित्र्यतिथय इति पर्वतिथयः । कालश्च नैकश्चानेके, कार्याणि लोकानेकान्यशुभानि स्युरेवेति । ननु कालपावित्र्यपर्वतिथीनां कार्यपावित्र्यपर्वतिथीनां क्षये पश्चाङ्गे दृष्टे आराधनाविधौ भेदोऽस्ति कश्चिदिति ? अस्तीति प्रतिपद्यस्व । कालपावित्र्यतिथीनां क्षये नियमेन पूर्वस्या व्यपदेशं निरस्य क्षीणाया अपि कालपावित्र्यतिथेर्व्यपदेशं विधाय कालपावित्र्यपर्वतिथिराराध्या, कालस्य क्रमवर्त्तित्वाद्युगपद्वृत्तित्वाभावाच्च । कार्यपावित्र्यपर्वतिथयस्तु द्विविधा तिथिनामाचरणान्वितास्तद्रहिताः । आद्या अक्षयतृतीयाद्या, द्वितीया श्रीऋषभादिजिनादीनां च्यवनादिकल्याणकादियुता । तत्राद्यायां कालपावित्र्यपर्वतिथिवद् व्यपदेशाराधनादि, परस्यां तु सहैव एकद्वयादिकल्याणकानां, भिन्नभिन्नतपसो वृद्धयाऽऽम्नायादिति । ननु कालपावित्र्यपर्वतिथि-तिथिनामाचरणान्वितकार्यपावित्र्यतिथ्योर्व्यपदेशस्य युगपत्प्राप्तौ कार्य-

चन्द्रसंवत्सरे सूर्यप्रज्ञप्त्यादिषु तिथीनां पट्कं पात्यते, सांशत्वाचान्द्रवर्षस्य। कौटिलेयादिषु षड् दिनानि पात्यन्ते, चान्द्रसंवत्सरस्य निरंशचतुष्पञ्चाशदधिकत्रिशतदिनमानाभ्युपगमेन निरंशस्याभ्युपगमः। कर्मसंवत्सरस्तु सर्वेषां मतेन निरंशषष्ट्यधिकत्रिशतदिनमान एव। साम्प्रतीनपञ्चाङ्गानि दिनापरपर्यायं रव्यादिवारमेवैकं द्वयोस्तिथ्योः रक्षयित्वा दिवसक्षयमेव विदधत इति वारदिनतिथिनामैक्यमेवैषां तत्त्वत इति।

ननु लौकिकपञ्चाङ्गेष्वनियततया यदि तिथीनां क्षयस्तदा एकाकिन्याः स्वपर्वतिथेः पर्वानन्तरवर्तिन्याः पर्वतिथेः क्षये स्वाभिमतपर्वणामाराधनाय कां व्यवस्थां कुर्वते लौकिका? इति चेत्। न ते नव्योत्थापका इव पर्वतिथीनां क्षीणत्वं साङ्कर्यं वेच्छन्ति। लौकिका अपि भाद्रपदकृष्णाष्टम्यादीनां

परं वृद्धावष्टम्यादीनां प्रागहोरात्रस्य नियमविधानबलादष्टम्यादिव्यपदेश्यत्वस्याभावेऽपि द्वितीयसप्तम्यादिव्यपदेश्यत्वं कुत? इति। आनवमीसूर्योदयं यावत् 'उदयमी'त्यादिवाक्येनासद्भोगाप्यष्टमीति न्यायसिद्धं व्यवहारमनुसृत्याऽष्टमीसूर्योदयं सप्तमीव्यवहाराद् द्वितीयाद्यास्ता सप्तम्यादयः आत्रिषष्टितमसूर्योदयं यावदेकषष्टितमाया एव तिथेः शास्त्रेऽपि व्यपदेशोऽस्त्येव द्विषष्टितमतिथिभोगसत्त्वेऽपीति।

नन्वेवं वृद्धौ हानौ च पर्वतिथीनां नियतसङ्ख्याकादेरस्तु पूर्वास्यामपरस्यां च क्रमेण तद्व्यपदेशाराधनादि, परं पूर्वासामपर्वतिथित्वे सप्तम्यादीनां व्यपदेशाभावो द्विव्यपदेशादि च यदि स्यातां न तत्र विरोधः कस्यचनापि, परं यदि ताः क्षीणा वृद्धा वा यदि पूर्णिमामे भवेतां, तदा का गतिः? यतस्तत्पूर्ववर्त्तिन्याश्चतुर्दश्याः पर्वतिथिरूपत्वात् तद्धानिवृद्धिर्भावयोः स्वीकारापत्तिरापद्यते दुर्निवारा, नियतसङ्ख्यासञ्ज्ञादिर्नियमोऽप्येवं कृता चाऽऽमूलचूलं विशीर्येत अकृतेऽपि तथाकरणे पूर्णिमामावास्ययोर्हानेर्वृद्धेश्च स्वीकारापत्तिस्तथाविधा दुर्वारैवेत्युभयतः पाशारज्जावापतिता वयमिति चेत्। सत्यं, 'यावत्सम्भवस्तावद्विधि'रितिन्यायमनवबुध्यमानाश्चेद् भवन्तो भवेयुरेव तथा पाशपतिताः, न च तत्र वः शरणं कोऽपि परमुक्तन्याय-

...वबुध्य चेद्भवन्तस्तमवलम्बयेयुस्तर्हि त्रयोदश्या ह्रानिर्वृद्धिर्वा
...भवेदेव भवतां कान्दिशीकानां त्राणपरेति। नन्वस्त्येष न्यायः,
...शरणं भवेच्चोभयतः पाशकर्त्तने, परं 'न्याया हि स्थविर-
...यष्टिप्राया' इत्यनेकान्तिकं तच्छरणं, शास्त्रप्रवृत्तिश्चेष्टार्था,
...इष्टश्चौदयिक्यामेव पर्वतिथौ तद्व्यपदेशादिभावः। यत उक्तं
...विचारसारादौ—'उदयवइसु कायव्व'ति। अत्र चोदययुक्ताया
...अपि चतुर्दश्यास्तत्त्वेन व्यपदेशाद्यभावोऽनिष्ट आसजति।
...ततो नापगता कान्दिशीकताऽस्माकमिति। सत्यं, शास्त्रमपि
...तेषामेव शासनत्राणार्थकं भवति, ये स्युर्न यथाश्रुतग्राहिणः।
...थाविधानां तु तदेव शास्त्रं 'मातृवत्परदारेषि्व'तिपाठात्
...राङ्गनालिङ्गनादिकारकबोद्धवत् परमबाधाहेतुरेव।

ननु किमत्र तर्हि तत्त्वमिति ? चेच्छृणुत, नहीदम् 'उदयंमि
...तही'ति 'उदयवइसु कायव्वं'ति पाठश्च पर्वतिथेरुदयवतीत्व-
...मुदयवत्यामेव च तद्व्यपदेशादिकृतिं सूचयति। तथैकान्ताग्रहे
...च क्षीणानां सञ्ज्ञाराधनादि समूलमुच्छिद्येत, तासामुदयवतीत्वा-
...भावात्। वृद्धासु च तासु द्विःसञ्ज्ञाव्यवहृत्याराधनादि कार्यं
...स्यात्, द्वयोरप्युदयवतीत्वात्। नियतसङ्ख्यासञ्ज्ञादिनियमश्च
...चं चूर्यंत एव शतश इति। ननूक्तिस्तत्रभवतो भवतः श्रुता,
...परं न विश्रुतयशा यतः—शास्त्रेषु तावदपवादानां प्रवृत्तिः शतशः
...न चापवादा बाधका इति च, 'उदयंमी'त्यादय उत्सर्गाः, 'क्षये
...पूर्वे'त्याद्याश्चापवादाः तैभिश्च बाधा तेषामिति। क्षयवृद्धिप्रसंगा-

[illegible]

[illegible] 'क्षये पूर्वे' इत्यादिकः प्रवर्तितोऽनुद-
यवतीमुदयवतीं कर्तुमीशः । सूर्योदयो हि लोकानुभवप्रसूतः
स च न प्रजापतिनाऽपि विपर्यासितुं शक्यः । कथं चानुदयवत्यां
पर्वतिथौ तदाराधनाकर्तॄणां मिथ्यात्वादयः ? कथं च ते
'क्षये पूर्वे' इत्यादिना अपसर्पेयुः लब्धप्रसराः । तत आल-
जालमेव वावदूकवाग्जालमिति ।

ननु तर्ह्युदयं मीत्यादिना किं क्रियते ? कथं चान्यथाकारो
यस्मिन्नाज्ञाभङ्गादयो दोषाः ? कथं च हानिवृद्धिप्रसंगे न ते
बाधितुमलममलबोधवतां तथा तथाव्यपदेशादि कृत्वाऽऽराधना-
माराधयतामिति । मा मुग्धा भूत । आदौ तावदुदयं मीत्यस्यार्थमेव

मिति। सत्यं, परमभाविताग्रभागार्थस्य तत्तथाविधमेवावतिष्ठत। यदा चास्मसूर्योदयादपरसूर्योदयं तिथीनां व्यपदेशादि कार्य-मिति नियमो मनोमन्दिरमाविशेत्तदैवापरभागोद्घाटनस्यावसर इति नोद्घाटितोऽपरभागः। उद्घाटयते चाधुना स भवता-मनधानां जिज्ञासापूर्त्तये। आदौ तावत् पूर्वोक्तनियमं समुत्सृज्य भोगकाले तत्तत्तिथीनां तत्तत्तिथ्यादिव्यपदेशादि ये कुर्युस्ते 'अहोरत्तं जाव पडिपुण्णे पोसहे'त्ति 'उग्गए सूरिए'त्यादि 'पाणहारदिवसचरिमं'ति सेसदिवसं रत्तिमित्यादीनि चापरि-मितान्यखिलमहोरात्रं यावत्तिथिव्यपदेशादिरूपाणि, भगवदा-गमवाक्यानि भञ्ज्येयुरेव। अनवस्था तु शासननिरपेक्षायाः प्रवृत्तेरादरणीयतायां स्फुटैव स्फुटितमतिमताम्। अवमरात्र-दृष्टान्तसिद्धां सूर्योदयमध्ये तिथिममन्वानः श्रद्धासद्बोधादि-व्यपगमाद्रत्नत्रयीमनापद्यमानो मिथ्यात्वतरलितहृदयः स्याद्। विराधना च प्रत्याख्यानादिलोपजा निराबाधेति स्पष्टमूह्यतां भोगवत्यास्तिथ्या व्यपदेशादिष्विति। एतेषां च दोषाणां न कणोऽपि'क्षये पूर्वे'त्यादिप्रघोषप्राबल्येन पूर्वोत्तरयोर्व्यपदेशा-राधनादिष्विति मतिमतां मान्यतमः पन्था एषः। ननु तत्तत्-पर्वतिथिनामाङ्कितेषु पाक्षिकाद्यावश्यकादिकालव्यापिन्यो यदि परिगृह्य तदहोरात्रमर्यादया तत्तत्पर्वतिथीनामङ्गीकारे कथ-मनामङ्कादयो दोषाः समुत्पद्यन्ते ?। यतो यथा चतुर्दश्युदय-युता कैश्चित्परिगृहीता तामाश्रित्य च तद्वासरे तन्नामाङ्कि

पन्थाः सामाचारीमवश्यमपेक्षेत। यत एकविधेऽपि शास्त्रमार्गे सामाचारीणां वैचित्र्यं विदुषामविरुद्धमेवेति। तथाविधायाः सामाचार्या दर्शनमावश्यकमिति चेत्। सत्यं उक्तं, परं यत् शास्त्रे स्पष्टतया न निर्दिष्टं तत्रैव सामाचारीणां वैचित्र्यं। लोकानुभावसाधिते शास्त्रीयविध्युपेते विधौ न वैचित्र्यं सामाचारीणाम्। अन्यथा सर्वाण्यपि जगद्वर्तियूथीयमतानि स्वस्वसामाचारीनाम्ना संवरनिर्जराद्वारा मोक्षसिद्धिमासादयेयुरिति। शास्त्रसिद्धशोदययुक्तायां पर्वतिथिव्यपदेशाराधनामार्ग इति नावश्यकं तत्र सामाचार्या दर्शनमिति। ननु शास्त्रसिद्धे तर्हि सांवत्सरिके चातुर्मासिके च कथमाचरणाऽपरपर्याया सामाचारी पृथग्रूपा, यतस्तौ पञ्चम्यां पञ्चदश्यां च क्रमेण शास्त्रसिद्धौ, आचर्यते च चतुर्थ्यां चतुर्दश्यां चेति। शास्त्रसिद्धेऽपि तथासामाचारीदर्शनपृच्छा नाऽनावश्यकीति चेत्। 'अंतरावि य से कप्पइ'ति शास्त्रनिर्दिष्टपन्थानमनुसृत्यैव पञ्चमीमनादृत्य चतुर्थी सांवत्सरिकपर्वतिथित्वेन भाद्रपदशुक्लीया प्रवर्तिता, तत्परावर्तीन पूर्णिमाश्चाद्यन्तप्रतिदिनमानान्तररक्षणायाऽऽषाढ्याः कार्तिक्याश्च तद्वत् न फाल्गुन्याश्च परावर्तः। पाक्षिकपर्वाणि तु [illegible] चतुर्दश्यामन्तर्भूतत्वादमनन्तर्भूतमेव। यच्च 'तव्वसेण पक्खियाणि [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible]दिति। न च [illegible]

रात्रौ आगतः, पश्चात्तनाः कथं तमनुवर्त्तयेयुः पर्यावर्त्तम्?
इति । 'नो कप्पइ से तं रयणिं उवायणावित्तए'त्ति सांवत्सरिका-
धिकने पूर्वरात्रस्थितापत्तिरेवेति न शास्त्रोक्तिः किं न
स्मर्यते?, येनानन्तरमेवं प्रलप्यते इति कृतं प्रसङ्गेन ।
पक्षे तु तथाऽऽसामाचारीदृष्टा प्रवर्त्ततीति सा प्रदर्श्यते-
अतो जैनज्योतिष्करण्डकमपेक्ष्य प्रतियुगमन्त्याषाढपूर्णिमायाः
क्षय एव स्यात्, तथाप्यवस्थानपर्युषणाप्रक्रमे आचारप्रकल्प-
चारदशाचूर्ण्योराषाढचितयाऽऽषाढपूर्णिमाऽभ्युक्ता स्पष्टाक्षरैः ।
ततः स्पष्टमिदमापन्नं यत्पर्वतिथेः क्षयेऽपि तत्कृत्यपर्व-
आराधनादि पूर्वं तस्यां कार्यमिति । पाक्षिकं च चतुर्दश्यां नियतं
प्रतिक्रमणमिति पर्वतिथीनां नियतसङ्ख्यासम्बन्धात्तत्क्षये तस्यामेव
त्रयोदश्यामेवेति न तत्र विवादकणोऽपि विदुषामिति ।

किञ्च-श्रीहीरप्रश्नोत्तरे पञ्चम्याः पूर्णिमायाश्च पाते तत्तपः-
प्रश्न उद्भूतः । तत्र पञ्चमीतपःकरणे पूर्वस्यामित्येकवचनं प्रश्ना-
नुकूलमुत्तरितम् । पूर्णिमातपोविषये तु त्रयोदशी-चतुर्दश्योरिति
द्विवचनेनोत्तरयन्तः श्रीहीरसूरयोऽविवादं त्रयोदशीचतुर्दश्यो-
श्चतुर्दशीपूर्णिमयोः सम्बन्धाराधनादि सूचयन्ति । न च वाच्यं
पूर्णिमायाः तपः षष्ठरूपं, तच्च द्व्यहभावीत्युत्तरितं
द्विवचनेनेति । यतस्तत्रैवोत्तरे त एव प्रोचुः-'त्रयोदश्यां
विस्मृतौ तु प्रतिपद्यपी'त्युभयत्राप्येकवचनान्तमुत्तरम् । नन्वत्र
कथं त्यक्ता चतुर्दशी?, त्रयोदशीप्रतिपदोः ग्रहादिति चेद् । अत एव
यतो विस्मृतिः, का? पूर्णिमायाः परदिनत्वात्तदनवलोकनात्

पञ्चदशी क्षीणेति नावबुद्धम् । ततश्च त्रयोदश्यां चतुर्दश्याः सञ्ज्ञाराधनादि न कृतं द्वितीये त्वह्नि चतुर्दश्यस्तीति चतुर्दश्याः सञ्ज्ञाराधनादि कृतम् । ततः पारिशेष्यात् प्रतिपद्येव विस्मरणशीलानां पूर्णिमायाः सञ्ज्ञाराधनादिकरणमायातं तथैव चोक्तं तत्रेति । अन्यच्च चतुर्दशीपञ्चदश्योः सहैवाराध्यत्वाद् विस्मृतावपि चतुर्दश्या अनन्तरा प्रतिपदेव गृहीता, न तपःपूर्त्तेरनन्तरां पञ्चदशीं यां काञ्चन वा तिथिं तत्तपःकरणायाहुरिति । समग्रमेतत् पञ्चदश्याः क्षये, त्रयोदश्यां चतुर्दश्याश्चतुर्दश्यां च पञ्चदश्याः सञ्ज्ञानिवेशाराधनादि स्पष्टमेव । त्रयोदश्यामित्यनेनैकवचनेनानवबुद्धशब्दशास्त्र–तद्वेत्तृत्वाभिमानिकृतः 'सुजर्थै'रिति प्रोक्तिर्निरस्ततमा । नेमे सङ्ख्ये, किन्तु तिथी इति । वृद्धौ चोत्तरस्याः पर्वतिथेस्तद्व्यपदेशादिसङ्कलितत्वात् श्रीहीरप्रश्नोत्तरसमुच्चये अमावास्याः सत्यामपि द्वितीयामायां कल्पवाचनप्रसङ्गे निर्विशेषणमेवामावास्यायामिति गृहीता सेति द्वितीयैव तद्व्यपदेशाराधनार्हेति सामाचारी प्रदर्शिता । सेनप्रश्ने त्वेकादश्यादेर्वृद्धौ सत्यां 'उदयंमी'त्याद्यनुसृत्य द्वितीयैव तत्सञ्ज्ञादिद्वाराऽऽराध्येति सूचनपरं, द्वितीयस्या एव तस्या औदयिकीशब्दाङ्कितत्वं तदपि पूर्वस्यास्तस्यास्तत्त्वनिरसनपूर्वमेवेति । चतुर्दश्याः क्षये च 'त्रयोदश्यां त्रयोदशी'तिसञ्ज्ञाया विस्तरेण साक्षेपं च तत्त्वतरङ्गिण्यां प्रबन्ध इति पर्वानन्तरपर्वतिथेर्वृद्धौ पूर्वतरस्यामपर्वतिथौ चतुर्दश्यादौ त्रयोदश्यादेश्चतुर्दश्यादेश्चाद्य-

[illegible]नाद्यकृतेः स्थितेषु भावतः, आवश्यकागमेन निषेधक-
[illegible]त्वात् । अथ च कालान्तरकालेऽपि [illegible] द्वितीया-
दिप्रतिपत्तिनिर्वचने 'आदेशो न मोक्तव्य' इति वचसा
पुनरुक्तयते । न पुनरुक्तत्वेन निषेध स्यादिति ।
अथ प्रतिक्रमणादयः स्युरनुष्ठानानि यत् तदा तल्पेषु
तपोधनादयः कश्चित्काले गत इति, परं प्रतिक्रमण-
स्थाः नाऽकर्मनिष्ठतो मोक्षमार्गे तत् तादृशस्याराधनां
विधातुमिति जगद्विदितमेव । बाहुल्येन तु तथाविधाना-
मारम्भकानां समुदायसाध्यानि धर्मानुष्ठानानि बालवृद्ध-
ग्लानाद्युपकारीणि चेति पौषधाद्याराधना तिथिभिर्नियम्यते ।
एवं च नियत पौषधाद्यनुष्ठानेन तिथयो नियमिताः ।
ततश्च जीवनादरकादिवदेकपदनियतमेवेदं 'धर्मानुष्ठानं पौषध'
इत्यादि वच इति । कायोत्सर्गमानवन्नियतपर्वतिथिमान-
मन्यदिनेऽधिकमानकायोत्सर्गवद्विधिरयमपर्वपौषधं न किमिति?
चेत्, कः किमाह, नहि कायोत्सर्गस्य कदापि जिनकल्पिकाद्याः
कायोत्सर्गकालमन्तरा एव (?) । स्थविरकल्पिकमुन्यादीनां नहि
कायोत्सर्गकविरविधिः । चेष्टाकायोत्सर्गो निरन्तरं वर्षं
यावदपि बाहुबल्यादेरिव अभिभवकायोत्सर्गोऽपि यावदभिमतं
जीवितान्तं भवत्येव । न च वाच्यं 'साय सयं
गोसद्धं' मित्यादिविधिविहितकायोत्सर्गाणामन्यूनाधिकनियतकालं
[illegible]धिरिति । प्रतिक्रमणावश्यकेन विशुद्धिमना-

चेत्। सत्यम् 'कृत्रिमाकृत्रिमयोः कृत्रिमे' इति न्यायः शब्दशास्त्रे विस्तृत एव। अत्र चाद्यायाः सम्पूर्णमहोरात्रं विद्यमानत्वं तेन स्वाभाविकी सेत्यकृत्रिमा, द्वितीया तु स्तोककालं सूर्यस्पर्शात् सम्पूर्णमहोरात्रं न स्वाभाविकी, किन्तु 'उदयंमि जा तिही'त्यादिगाथया सम्पूर्णं तमहोरात्रं यावत व्यपदेश्यतया सञ्ज्ञितेत्य(ति)कृत्रिमा, तत्राहोरात्रं यावत्कथनात्। ततो द्वितीयैवौदयिकीत्वेन निर्दिष्टेति। यद्वा 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्यायाद् द्वितीयायास्तस्या आपाढीन्यायेन मुख्यत्वात्तत्रैवोदयिकीकार्यामिति।

ननु कं कालं जैनसिद्धान्तानुगं टीप्पनकं लोके जैने वा प्रचरदभूदितिचेत्। न कस्मिन्नपि जैनानां टीप्पनकं प्रचलदभूत्। अत एव भगवतां श्रीऋषभादीनां कल्याणकादीनां मासा दिनाश्च लौकिका एव दृश्यन्ते। यावद्भगवतः श्रीमहावीरस्य मोक्षकल्याणकेऽपि कार्त्तिकामावास्येत्युक्तं। 'चंदे नामं से दोच्चे संवच्छरे यावत् निरतित्ति पवुच्चई'त्यन्तेन पाठेन चान्द्रादिव्यवहारस्य कतिचिच्छिष्टजनविषयत्वं ज्ञापितं श्रीमद्भिर्भद्रबाहुस्वामिभिः। प्राचीनकाले जैनटीप्पनकमभूत तदधुना व्युच्छिन्नमित्यादिवाक्यानि त्ववमरात्रमासवृद्ध्यादिषु जैनोक्त्यविरोधि–कौटिल्यादिज्ञापितज्योतिष्कपराणीति।

ननु पाक्षिके प्रतिक्रमणे 'पन्नरसण्हं राइंदियाणं'मिति पठ्यते। पक्षे चावमरात्रापेक्षया चतुर्दश रात्रिंदिवानि वर्तमान-

[illegible]

ननु अभिवर्धिते वर्षे [illegible] सांवत्सरिकस्य भाद्रपदशुक्लपञ्चम्यां [illegible] त्वेनाम्नानात् [illegible] स्यादिति । अनादिशासनस्थ्या भाद्रपदशुक्लपञ्चम्या एव सांवत्सरिककालपावित्र्यवत्त्वान्नो कल्पते तां रात्रिमतिक्रमितुं । भगवद्भिश्च कालकाचार्यैः सांवत्सरिककृत्यार्थं चतुर्थ्याः पर्वत्वेन स्वीकारे पञ्चम्यास्तत्पावित्र्यं नापहृतं । तत एव न प्रश्नोत्तरेषु पञ्चमीं तामभिगृह्याष्टमपष्ठ्योः करणमादिष्टमिति ।

नन्वस्तु पूर्णिमाऽमयोर्हानिवृद्ध्योश्चतुर्दश्याश्चतुष्पर्व्यन्तर्गतत्वेन तद्व्यपदेशाभावद्विर्भावप्रसङ्गवारणाय त्रयोदश्या एव व्यपदेशाभाव–द्विर्व्यपदेशभावौ भवतां, परं भाद्रपदपञ्चम्या हानिवृद्ध्योस्तत्पूर्वतन्याश्चतुर्थ्याः सांवत्सरिकक्रियाश्रयत्वेनाचरणयाचीर्णत्वात् कथं न तद्व्यपदेशाभावद्विर्व्यपदेशभावौ स्यातामिति चेत्। ननु चतुर्थ्यां हानिवृद्ध्योः किं तावत्कार्यं भवद्भिः ? । 'क्षये पूर्वे'त्यादिकप्रघोषप्रवृत्तिश्चेत्, कथं ? । तत्प्रघोषस्य पर्वतिथेरेव हानिवृद्धिविषयत्वात्। नैव चेत्तत्र तत्प्रघोषप्रवृत्तिः, कथं तत्तृतीयायां हानिप्रसङ्गे सांवत्सरिक-

[illegible] नवमी - अष्टमी - कल्याणकपर्वतिथ्या-राधितानामपि हानिवृद्ध्योः 'क्षये पूर्वे'ति प्रघोषस्य क्रियमाणा प्रवृत्तिरागमिकमार्गमनुसरेदिति । न च [illegible] जैनशास्त्रकृत-मित्यभ्यासितमपि तथा क्रियते । [illegible]कृतानि विशेषतश्च जैनेन्द्रे तस्मिन्नागमप्रवृत्तीनामेवाप्रमाणत्वात् वृद्धाचरितार्थपर-तीर्थयात्रानुसरणं नैव परलोकहितावहम् । यत आहुः श्रीहरिभद्रसूरय 'परलोकविहिम्मी माणं वयण'मिति 'तक्कारी स नियमा'दित्यादि 'समतीपतिती सव्वे' त्यादि च । श्रीश्रम-णसङ्घस्याज्ञानुसार्येव, 'आणाजुत्तो संघो'त्युक्तेः । संसा-रोत्तारणपरं जैनशासनापरपर्यायं तीर्थमपि 'पावयणं तित्थं'ति वचनात् । भयद्वृद्धैरप्यनुन्मुख्य शास्त्रमविधाय च युक्तैः परम्परानुगतायाः समाधानं, गद्दुरिकाप्रणीवदेव कृतं । तच्चाधुना चित्त श्रीश्रमणसङ्घेऽशेषे शास्त्रनिरपेक्षमुत्थाप्य चार्हं पारम्पर्यं यदि कृतं प्रमाणपदवीमासादयेत् नैव कार्यः स्यादगारवासस्य मिथ्यात्वांङ्कितमतस्य वा परिहारः । न च वाच्यं स्वभावे-नैव चन्द्रचारस्तदुत्पन्नाश्च यदि स्वभावतः क्षीणास्तिथयस्तर्हि के वयम् ? इति । यतो नहि पदार्थस्वभावानुमताराधनाश्रद्धाः, किन्तु सम्यग्दर्शनादिमयमोक्षमार्गाराधनामात्रश्रद्धाकाः । भग-वन्महावीरस्य मतमप्युत्थानकर्मबलवीर्यपुरुषकारपराक्रमकार्यानु गमेव, 'नमो अरिहंताण'मित्यस्य परमेष्ठीमुख्यपदस्यारि-भूतानां कर्मणां हन्तारो अरिहंतार इत्यादिव्याख्याने पराक्रमस्य प्राधान्यद्योतनात् । ततश्च स्वभावतः क्षीणाया अपि पर्वतिथेः

पूर्वतिथेः स्थाने व्यपदेशो विधेय एव । अन्यथा बालास्तदनुष्ठानं क्षीणत्वमालम्ब्य त्यक्ष्यन्त्येव । मिश्रत्वे तु पूर्वाह्णे त्रयोदश्या अपराह्णे च चतुर्दश्याः कार्यं कार्यं स्यात् । पर्वतिथेरहोरात्रमानता सम्पूर्णाहोरात्रमाराधनाकार्यं च न स्यात् । ननु यथा क्षीणा पर्वतिथिरित्युच्यमाने आराधनालोपस्तथा वृद्धिरित्युच्यमाने द्विर्भावोऽप्याराधनाया भविष्यतीति समे एव वृद्धिहानी इति यथास्वभावागतमेव किमिति न वाच्यमिति चेत् । प्रथमं तावद् द्वयोरपि पक्षयोः नियतसञ्ज्ञासङ्ख्याकपर्वतिथिव्यवहारो लुप्यते । शास्त्रोक्तीणां स्वकल्पिता च प्रवृत्तिस्तीर्थकरोद्देशवत्यपि संसारफलैवेति स्पष्टं निष्टङ्कयन्ति श्रीहरिभद्रसूरिपादाः । किञ्च–तिथीनां वृद्धिर्न जैनज्योतिष्कगणितानुसारिणी, वृद्धाभ्यश्च तिथिभ्यो हीनास्तिथयोऽधिका एव न तुल्यायव्ययत्वम् । अन्यच्च वृद्धानां तासां नपुंसकाख्या त्वयापि प्रकाश्यते आनुकूल्यं च बालानां तत् । ततः क्षीणामपि व्यपदिश्य वृद्धाया एकमेव व्यपदेशं कृत्वा नोपदेशादिकार्यं स्याद्, येन व्यवस्था न शीर्येतेति ।

ननु पर्वतिथिं नियतमाराधयतां यदि पञ्चाङ्गविलोकनव्यत्ययविस्मृतिरोगादिभिस्तत्तत्पर्वतिथौ तत्तदवधारितं तपो न भवति, द्वितीयदिनादिष्वपि तत्कार्यते, तत्र किं तस्या आराधनीयायाः पर्वतिथेर्व्यपदेशो भवति? न, तत्राप्याश्रितरतपःकारणं कथं सङ्गच्छते? इति चेत् । सत्यं, द्वितीयदिना-

दिषु तत्तत्पर्व तिथीनां व्यपदेशा नैव भवन्ति, परं यद्
तत्पर्व तिथेस्तपः कार्यं तत्तपोलोपरक्षणाय, तथाचाप-
वादभूतमपि तितच्चर्चिन्तायामुपयोगीति। ननु पर्व तिथीनां व्यप-
देशे सत्येव तदाराधनेष्टा चेत् किमिति 'अणागयमइक्कंतं'
इति तपसो भेदावुक्ताविति चेत्। सत्यम्, तयोर्भेदयोरु-
क्तिरेव ज्ञापयति—यद्—यदा पर्युषणादिवसो भवेत्तं दिवसमत्य-
तर्यैव परिगृह्याऽष्टमः कार्यः, परं तद्व्यपदिश्यमानतिथौ
नियतभाविरोगादिभिर्न शक्नुयात्तपो विधातुं तदैवादाव-
नागतं कुर्यात, चिकीर्षायां तस्यां तपःकरणस्य तत्पर्व तिथावेव
यदाऽऽकस्मिकं रोगाद्यापतितं, न च शक्तोऽभूत्तत्तपो विधातुं
तदाऽतिक्रान्तायामपि तिथौ पर्वणस्तत्तपस्तदुद्देशेन कार्यम्। अत्र-
धेयमिदमत्र—पाक्षिकादिषु चतुर्थादिरूपं तपस्तत्तिथिव्यपदेश-
पूर्वकमपि पक्षादितिथिसमूहजातप्रायश्चित्तरूपमपि, ततस्तस्या-
वश्यं कार्यत्वादनागतातिक्रान्तभेदौ, तावपि चापवादादेव,
पर्युषणादीनामेव। तथा चाष्टम्यादिषु क्रियमाणानां तपसां
नाऽनागतादि किन्तु द्वितीयतत्सञ्ज्ञकतिथौ क्रियमाणता, पूर्णि-
मायास्तु युग्मपर्वानन्तर्यार्थमेव प्रतिपदीत्यप्युच्यते इति।

ननु भगवतां जिनानां कल्याणकानि 'चउ उत्तरासाढे'
त्यादिवचनकदम्बकान्नक्षत्रप्रधानानि। सत्यप्येवं किमिति
तानि तिथिमवलोक्य विधाप्यन्ते?, न तु ऋक्षमिति चेत्।

सत्यम्, प्राक् नक्षत्राणां पञ्चदश त्रिंशत्पञ्चचत्वारिंशच्च
यावन्नक्षत्रेण भोगो मत आसीत्। अधुना तु दिनोपभोगीनि

नक्षत्राणि गण्यन्ते इति हेतोस्तत्प्राधान्यं त्यक्त्वा तिथेः प्राधान्येन तानि कार्यन्ते । रोहिणीतपो यद्यपि नक्षत्रं, ऋक्षं प्रधानीकृत्य क्रियते, परं तदपि तद्वर्ती तिथिमेवाश्रित्य । तत्त्वतस्तु तिथिनिश्रितमस्ति ।

ननु पर्वतिथीनां क्षये पूर्वतिथौ तस्या विद्यमानत्वादा राधना यदा, तदा को बाधः ? । यतो व्यपदेशस्तत्र तस्याः क्रियमाणो न निर्मूलः, तस्यास्तत्रैव भोगात् । एवं सति च अनियतमिश्रतिथिवादिनां नैव स्यादुत्थापकतेति चेत् । सत्यम्, प्राक्तावत् 'उदयंमि जा तिही' त्यनेनोदययुक्ताया-मेव व्यपदेशकरणस्य याऽऽज्ञा सा भोगमात्रेण व्यपदेशाङ्गी-कारेण समूलमेव विराद्धा स्यात् । किञ्च-'पडिपुण्णं अहोरत्त' मित्यनेन चूर्णिवचसा पर्वतिथिमुद्दिश्य क्रियमाणायाः पौष-धादिक्रियाया अहोरात्रमानता, तिथेश्चाहोरात्रं साद्यन्तं यावत् या व्यपदेशादिक्रिया साऽपि तेषामुत्थापकानां काकनाशं नश्येत् । न च वाच्यं प्राकृतिथावखिलमहोरात्रं यावत् सा व्यपदि-श्यते इति । यतः-शासनानुरागिणामेवैतन्मतं, तत्स्वीकारे स्वयमेव पूर्वा तिथिर्व्यपदिश्यते नेति द्राविडप्रणामन्यायेन तस्याः क्षयस्यैव स्वीकारः स्यात् । तमुत्थाप्यैव चोत्थाप-कताऽऽविष्कृतास्ति नूतनपान्थैरिति । ननु 'उदयंमि जा तिही'त्यादिनियमात्ताः सप्तम्यादितया प्रामाण्यं ते अष्टम्या-दीनां चाराधना क्रियत इति चेत् । युक्तं परं 'उदयंमि तिही'त्यादिर्नियमः पर्वतिथीरेवाश्रितोऽस्ति । अत एव

शातवाहनस्य राज्ञः न तु श्रीयुगप्रधानानां कालकसूरीणां। तैस्तु नृपोक्तमनुमतं, राज्ञा च प्राग्विज्ञप्तषष्ठीपर्युषणाकरणे कालिकाचार्यैः प्रतिपादितपञ्चम्यतिक्रमणदोषस्वीकारेण अत्रानागतेतिशब्दमनतिक्रमणमादर्शयता चतुर्थीपर्युषणाकरणं विज्ञप्तं सूरिभिरपि। तदर्थं 'मारओ वि'त्यागमवचोऽतिक्रमणार्थक्रमनागतार्थमालम्ब्यानुमता नृपविज्ञप्तिरिति स्पष्टतरे अनतिक्रमणार्थकेऽनागतशब्दे तस्य पञ्चम्यंशवत्यां पञ्चमीदिवसप्राक्तनदिवसवर्त्तिन्यामित्यादेरर्थस्योद्भावनं 'शुको जगा'वित्यस्य बिलाडचवर्णमित्यर्थकरणानुकारमेव। न च तदानीं जैनैरनुमता कासाञ्चिदपि तिथीनां वृद्धिः। न च भाद्रपदशुक्लेऽवमरात्रसम्भव इति निर्मूले एव तथाविधे अर्थकृत्यौ अवमरात्रन्यायेन सूर्योदयस्पर्शवत्या एव तिथेः समग्रमहोरात्रं व्याप्तेर्व्यर्थोऽंशविकल्पश्च व्यपदेशापेक्षया तृतीयायाः क्षये वृद्धौ वा सांवत्सरिकी चतुर्थी पञ्चमीतिथ्या युक्तैवार्वाक्तन्येव चास्ति परं यथार्थं व्याख्यानमेव शासनस्य मूलमिति विशदीकृतिरिति ॥

चित्रयुक्त्यागमैर्दृब्धं वीक्ष्यैनं तिथिदर्पणम्।
भव्या भजन्तु सन्मार्गं श्रेयो निःश्रेयसावहम् ॥१॥
शास्त्रं परम्परां श्रित्वा सृष्टोऽयं तिथिदर्पणः।
चतुराढ्ये सहस्रे द्वौ व्यतीते सुरते पुरे ॥२॥
ताम्रपत्रागमे चैत्ये वीरभगवद्भिर्भूपिते।
प्रतिष्ठापयितुं वीरं यतेनानन्दसाधुना ॥३॥ युग्मम्

सूर्यो हि श्रावणकृष्णप्रतिपद्येव मण्डलमाक्रमितुमारभते इति स समयः ऋत्वयनवर्षाणामादित्वेन वक्तुमुचितः।

ननु वैक्रमीयः संवत्सरोऽधुना गुर्जरदेशादिषु प्रवर्त्तते, स कार्तिकादिः शुक्लपक्षादिश्च। तत्र को हेतुः? इति।

शास्त्रेषु तु 'वहुलाइया पक्खा सावणाइया मासे'त्याद्युक्तमिति। विक्रमनृपो हि श्रीसिद्धसेनदिवाकरविभोर्धर्मबोधमाप्तः सन् लब्ध्वा वचनातिगां समृद्धिं संवत्सरं स्वनाम्ना प्रवर्त्तितुमुद्यतः। श्रीसिद्धसेनदिवाकरपादाश्चानन्यभक्ताः श्रीवीरजिनेश्वरस्येति श्रीवीरनिर्वाणाङ्कितां कार्तिकशुक्लप्रतिपद् (दं) सुधर्मस्वामिपट्टमहोत्सवरूपां समादिशन्। एवं कार्तिकाद्या मासाः शुक्लाद्याश्च पक्षाः प्रवृत्ताः संवत्सरादितयेति। चरमपूर्वधर–श्रीदेवर्द्धिगणिक्षमाश्रमणपूज्यविहितायाः सिद्धान्तानां पुस्तकारोहणक्रियायाः समाप्तिरपि तद्दिन एव। अत एव 'दसमस्स य सयस्स अयं असीइमे संवच्छरे काले गच्छइ'त्ति यथास्थितं वचनमिति। परमार्हत–श्रीकुमारपालभूपालेन नव्यः स्वकीयनाम्ना संवत्सरः प्रवर्त्तितः, परं सोऽपि कार्त्तिकादिमासाद्य एव। तेनापि कलिकालसर्वज्ञ–श्रीहेमचन्द्रसूर्युपदेशस्यानन्यतयाऽनुसरणादिति।

ननु अधिकमासौ प्राक् युगस्य मध्ये पौषः, अन्त्ये चाषाढ इति प्रतियुगं द्वावभूताम्। अधुनाऽपि वर्धेते द्वावेव प्रतियुगं परं न तावेव, अन्येषामपि वृद्धेस्तत्कथम्? इति।

तथाविधानां चान्द्रमासादावविवक्षणादावश्यकी कल्पना क्षयमासस्य ।

ननु युगस्य मध्ये पौषस्य वृद्धिर्युगादेरर्धतृतीयाब्दातिक्रमाद्वास्तवी परं कौटिलीये तद्युगमध्यमासस्य ग्रीष्मे वृद्धिरिति कथमुक्तं ? सत्यं, 'ग्रीष्मे' इत्यस्य पञ्चाब्दान्ते च पश्चिममित्यनेन सम्बन्धः। ज्येष्ठामूलीय आषाढश्च ग्रीष्म इति तदुक्तेः।

ननु प्रतियुगं मासद्वयवृद्धिभावात् कालचूलाधिकारीयं मासाधिकत्वमुपपद्यतां, परं तत्र 'संवच्छरीयकालंमी'त्यनेन संवत्सरस्याधिक्यमुक्तं । टीकाकारैश्च षष्ट्यब्दाद्यपेक्षयेत्युक्त्वा चानूदितं तत्कथमुपपद्यते ? यदि हि कर्ममासजसंवत्सरा अतिक्रम्यन्ते कर्मसंवत्सरः षष्टिरेकषष्टिर्सूर्यसङ्ख्यासाम्याय वर्धनीया एव, स चैक एवेति तदा संवत्सरवृद्धिर्नासम्भविनी, आदिशब्दाचान्द्रनाक्षत्रादिकाः एव गणयितव्याः ।

ननु कियन्तं कालं युगस्य मध्येऽन्त्ये च वृद्धेः पौषाषाढयोरेव वृद्धिर्व्यवहारे प्रवृत्तेति चेद् ।

श्रीउमास्वातिवाचका अपि स्वोपज्ञतत्त्वार्थभाष्ये एवमेव वृद्धिमाहुः। श्रीनिशीथभाष्यचूर्णिकाराद्या अपि युगमध्यान्त्ययोः पौषाषाढयोरेवमाहुः । ततः सुनिर्णयमेतद्यदुत–पूर्वधरकालं श्रीवीरभगवतः सहस्रं यावदेष एव व्यवहार इति ।

ननु भगवतः श्रीमतो हरिभद्रसूरेः काले स एव व्यवहारः अन्यो वाऽधुना प्रवर्त्तमानोऽनियतमासवृद्धिरूपो वा ? इति ।

सूर्यस्य योऽयनषष्ठांशः स मासः चन्द्रस्य सर्वमण्डलेषु अयन-द्वयसमाप्त्या मासोत्पत्तिस्तद्दीर्गेति ।

ननु सूर्यस्य मासस्तदयनषष्ठांशरूपः चन्द्रस्य द्वयन-कालमानः परं नाक्षत्रोऽभिवर्धितः कर्मजश्चेति कथं ते भवेयुः? इति । नक्षत्रमण्डलस्यावस्थितत्वेऽपि तेषां स्वस्वमण्डलेषु भ्रमणमस्त्येव । ततो नक्षत्राणां सप्तविंशत्या स्वमण्डलचारः सप्तविंशत्या दिनैः समाप्यते । ततः सप्तविंशतिमानो नाक्षत्रो मासः कथ्यते एतदेव कारणमाश्रित्य परैरेकैकभोग्यानि नक्षत्राण्यीत्युदाहृतमिति सम्भाव्यते । चन्द्रसूर्याभ्यां तु तेषां भोगस्तत्तच्चारसंयोगानुसारेणेति शास्त्रे आप्तोपज्ञे भिन्नो भिन्नः काल इति ।

ननु नक्षत्रस्य दिनभोग्यत्वाभावे कथमुच्यते 'जं नक्खत्तं जया एत्ति नेइ'त्ति । सत्यम्,उच्यते आप्तैरेतत् पर न तत् चन्द्रसूर्यान्यतरपरिभोगापेक्षया किन्तु नक्षत्र २७/६७ मासापेक्षया स हि सप्तविंशत्यहोरात्रमानः । अत एव युगे सौराः षष्टिर्मासाश्चान्द्रा द्वाषष्टिः परं नाक्षत्रास्तु सप्तषष्टिर्भवन्ति । कर्ममासः त्रिंशत्त्रिंशद्दिनात्मकः कृष्ण-प्रतिपदादिः पूर्णिमान्तः ऋत्वर्धरूपो वा । अभिवर्धितस्तु मासो न स्वतन्त्रः किन्तु युगस्य तृतीये पञ्चमे च वर्षे यौ पौषाषाढौ क्रमेण वृद्धिमाप्नुतस्तावेवापेक्ष्य तत्तद्वर्षयोरभि-वर्धितत्वं । तदभिवर्धितमासवद्वर्षस्य द्वादशमासा ए

पर्वतिथिः

युगकालस्याष्टादशशतैः षष्ट्यधिकैर्भाज्यमानप्रमाणा चन्द्रमण्डलस्य चतुरेकषष्टिभागहानिवृद्धिव्यङ्ग्या वा तिथिः। हानिर्वृद्धिर्वा चन्द्रकलानामनुक्षणमिति तत्तत्कलाचतुष्कहानिवृद्धिभ्यां कृष्णेतराः प्रतिपदादितिथयः। अत एव चन्द्रचारोत्पन्नास्तिथयः चन्द्रस्य कलानां हानिर्वृद्धिश्च तच्चारानुसारेणैव भावात्। भावतनसप्तम्यादितिथिप्रविष्टाया अष्टम्यादितिथेर्निषेधस्य अष्टम्यादितिथिप्रविष्टाया नवम्यादितिथेर्निरोधस्य कर्त्तुं वृद्धिहान्यतिरिक्तस्थलेऽशक्यत्वेन 'उदयंमि जा तिही'त्यादिना पर्वव्यवहारव्यपदेशयोर्विधेयत्वेन सिद्धत्वात् 'क्षये पूर्वे'त्यत्र व्यवहारव्यपदेशयोर्विधेयता स्वीकर्त्तव्या। यतः श्राद्धविधौ 'दिवसादिव्यवहारात्' इत्युक्तं। दिवसशब्दश्चात्र तिथिसञ्ज्ञार्थो नत्वहोरात्रार्थः। महोपाध्याया अपि 'त्रयोदशीति व्यपदेशस्याप्यसम्भवादिति चतुर्दश्येवेति व्यपदिश्यमानत्वा'दिति चाहुः। व्यपदेशो व्यवहारश्च धर्मशास्त्रकाव्यरीतिलोकव्यवहारादिषु न केवलौ सदसद्भावावपेक्षेते, तन्निरपेक्षयोरपि तयोर्दर्शनात्। एवमेवात्र पर्वतिथेर्व्यपदेशे व्यवहारेऽपि आराधनोपयोगिपर्वतिथिव्यवहारार्थं सदसतोरपि तिथ्योः स्वाभाविके क्षयवृद्ध्योः प्रस्तावे चासत्त्वं सत्त्वं च व्यवह्रियते व्यपदिश्यते च। तत्रानुकूल्यते स्वाभाविके सूर्योदयः क्षयवृद्ध्योश्च पूर्वोत्तरत्वमिति। 'क्षये पूर्वातिथिः कार्ये'त्यत्र पूर्वा सप्तम्यादिलक्षणाऽपर्वतिथिः

तिथिः अष्टम्यादिलक्षणा पर्वतिथिः कार्येत्येवं विधिपरायणत्वे
पूर्वेत्यत्रोद्देश्यत्वलक्षणगौणकर्मणि द्वितीयापत्तिर्दुर्निवारेति.
कार्येत्यस्य सञ्ज्ञेया व्यवहार्या व्यपदेश्या वेत्येव सञ्ज्ञा-
रत्वार्थ आराधनायामुन्नेयः। सञ्ज्ञा चान्यत्र विषये प्रवर्त्त-
मानायाः सञ्ज्ञाया न बाधिकेति मुहूर्त्तादौ तद्व्यपदेशादिनापि
न क्षतिः। एवमेव तथोत्तरेत्यत्रापि द्वितीयापत्तेर्निवारणं
सुकरमेव तथापि विधिनियमकरणमेव चेदिष्टं चेद्। विशे-
षणभाव एष्टव्यः पर्वतिथित्वेनेत्युभयत्राप्यध्याहार्यमिति।
था च क्षये वृद्धौ च यथा पर्वतिथेरित्यध्याहारस्यावश्यकत्वं
थैव पूर्वा उत्तरा चेत्यत्र पर्वतिथित्वेनेत्यध्याहारस्यावश्यकत्वम्।
एवं च पूर्वस्या उत्तरस्याश्चैव पर्वतिथिसञ्ज्ञा सिद्ध्येदेव।
एवं सप्तम्यादेरपर्वसञ्ज्ञायाः पूर्वाष्टम्यादेश्च पर्वतिथिसञ्ज्ञाया
निवृत्तिरार्थसमाजसिद्धैवेति ॥

शुद्धिपत्रक

पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध
५	१३	वादी-तापस्वी	वादि-तपस्वि
१४	१३	मूर्त्ता	मूर्ता
२१	३	स्वसचे.	स्वसंवे.
२३	२	मध्येऽ-	मध्ये-
३८	६/८	मिश्रे	मिश्रौ
३८	१०	रिफं	रिफः
,,	११	माप	मापः
,,	१२	मिश्रम्	मिश्रः
४०	७	च्छेदा-	च्छेद-
४३	१९	त्रयोदश	त्रयोदशः
४४	१६	नव	नवं
४८	२	नूपाङ्गा	तनूपाङ्गा
,,	१३	केकस्मिन्	केकस्मिन्
५१	१७	मुंहूता	मुहूर्त्ता
५४	२१	वदतरम्	वदन्तरम्
५५	१०	प्राक्	प्राक् (न)
५६	१७	युं	यु
,,	१८	पत्तेः/शाप	पत्तेः/शापः
५८	९	मिल	भिल
६०	१७	शजे	शजै
६१	१०	शसा	शंसा
६२	१३	वागवि	वाग्वि
६३	२०	न्दसंभें	सन्दर्भ
६४	३	राज्यु	राज्यु

७७	१४	कोट	कोटौ
८१	५	गुणा	गुण
८२	६	अष्टम्यादि	अष्टम्यादि
८६	११	मुदयवती	मुदयवर्ती
१०२	६	राद्धति	राध्यति
१०८	१३	मिथ्यात्त्व	मिथ्यात्व
११७	८	मुच्चायते	मुच्चार्यते
११९	९	प्रतिपक्ष	प्रतिपक्षं
१२९	१५	पादित	पादितं
१३१	१६	माहुः	माह
१३२	१२	वर्धनीया	वर्धनीय
१३४	१४	पर	परं

शुद्धिपत्रक

पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध
५	१३	वादी-सपस्ी	वादि-तपस्वि
१४	१३	मूर्त्ता	मूर्ता
२१	३	रवसवे.	स्वसंवे.
२३	२	मत्रेड-	मत्रे-
३८	६/८	मिश्रे	मिश्री
३८	१०	रिक्तं	रिक्तः
,,	११	माप	मापः
,,	१२	मिश्रम्	मिश्रः
४०	७	च्छेदा-	च्छेद-
४३	१५	त्रयोदश	त्रयोदशः
४४	१६	नव	नवं
४८	२	नूपाङ्गा	तनूपाङ्गा
,,	१३	केकस्मिन्	कैकस्मिन्
५१	१७	मुंहूर्ता	मुहूर्त्ता
५४	२१	दतरम्	वदन्तरम्
५५	१०	प्राक्	प्राक् (न)
५६	१७	युं	यु
,,	१८	पत्तेः/शाप	पत्तेः/शापः
५८	९	मिल	भिल
६०	१७	शजे	शजै
६१	१०	शसा	शंसा
६२	१३	वागवि	वाग्वि
६३	२०	न्दसंर्ग	सन्दर्भ
६४	३	राश्यु	राज्यु

७७	१४	कोट	कोटी
८१	५	गुणा	गुण
८२	६	अष्टम्यादि	अष्टम्यादि
८६	११	मुदयवती	मुदयवर्ती
१०२	६	राद्धति	राध्यति
१०८	१३	मिथ्यात्त्व	मिथ्यात्व
११७	८	मुचायते	मुच्चार्यते
११९	९	प्रतिपक्ष	प्रतिपक्षं
१२९	१५	पादित	पादितं
१३१	१६	माहुः	माह
१३२	१२	वर्धनीया	वर्धनीय
१३४	१४	पर	परं